Sasthramukthavali-39.

# PANCHALAKSHANI.

—(*)—

BY

Mahamahopadhyaya Sri Gadadharabhatta cl

WITH

MANI AND DIDHITI

OF

Gangesopadhyaya & Raghunathasiroman

EDITED BY

P. B. ANANTHACHARYA

Printed at the

SRI SUDARSANA PRESS.

CONJEEVERAM.

1911.

शास्त्रमुक्तावळी—३९.

# पञ्चलक्षणी ।

महामहोपाध्याय श्रीगदाधरभट्टाचार्य विरचिता

(*)

श्रीमद्गङ्गेशोपाध्यायेन रघुनाथशिरोमणिना च विरचिताभ्यां

मणि दीधितिभ्यां सह

श्रीकाञ्ची प्रतिवादिभयङ्करानन्ताचार्येण परिशोधिता

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्यत ।

श्रीकाञ्ची ।

१९११

श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

# शास्त्रमुक्तावली ।

## तत्त्वचिन्तामणौ-

# पञ्चलक्षणी ।

## *व्याप्तिग्रहोपायश्च वक्ष्यते ।

[ दीधितिः । ]

सर्वमिदं सति व्याप्तिनिश्चये स्यात्, सएव न सम्भवति, उपाया-भावादित्यतआह- व्याप्ती ति ।

[ गदाधरीयम् । ]

**सर्वमिदम्** – अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनम् । **व्याप्ति निश्चये सती** त्यन्वयः । **सएव**- व्याप्तिनिश्चय एव । **न सम्भवति**— ोत्पत्तुमर्हति । **उपायाभावात्**— निश्चायकाभावात् । अनुमानप्रामाण्योप ादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् **वक्ष्यत** इत्यनेन

* प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनु ानं निरूप्यते । तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्य ज्ञानमनुमितिः, तत्करणमनु ानम्, तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते ।

अथानुमानं न प्रमाणम्, योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययो ोपाधिशङ्कया व्यभिचारसंशयात्, शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च; ोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात्, संवादेन च ामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति न; अप्रमाणसाधर्म्येणाप्रामाण्यसाधने ष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयो परकीययोरप्रत्यक्षत्वात्, अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययो ाघाताच्च । अपिचानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तेः, प्रामाण्यस्यानुमेय- ात्, स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः। [इत्येताः पङ्क्तयोऽप्यत्रानुसन्धेयाः।]

# नन्वनुमितिहेतुभूतव्याप्तिज्ञाने का व्याप्तिः?

[दी] समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूप निरूपणमारभते- नन्वित्यादिना ।

---

तत्प्रतीक्षां विधाय, व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपं बीजं दर्शयन् नन्वित्यादिग्रन्थमवतारयति- **समारब्धे**ति। व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वात् **समारब्धे** ति परीक्षाविशेषणम् । परीक्षा च परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम् । **कारणीभूते** ति प्रतिपादनविशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय; **व्याप्तिग्रहोपायश्च वक्ष्यत** इत्येतद्ग्रन्थावतारणाद्व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात्; तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायप्रतिपादनस्येदानीमाकांक्षितत्वम्, एवमपि तन्न व्याप्तिस्वरूपनिरूपणं विना सम्भवतीति प्रथमतस्तदेवोचितमित्येतत्सूचनायैतदभिहितम् । **निदान** मिति । व्याप्तिघटकीभूताव्यभिचारांशभाने बाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः, साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे विशेषणज्ञानमुद्रया सहचारग्रहोहेतुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्याशक्यत्वादिति भावः । प्रथमतः पूर्वपक्षस्यैवाभिधानेन निरूपयतीत्यसङ्गतम्, अतः **आरभत** इत्युक्तम् । निरूपणस्य परमतनिराकरणपूर्वकसिद्धान्तकथनरूपतया पूर्वपक्षाभिधान तत्खण्डनयोरपि तदारम्भणरूपत्वेति ध्येयम् ।

## न तावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्,

---

मूले न तावदव्यभिचरितत्व मिति । व्याप्ति रिति प्रश्नस्थ मनुषज्यते । तथाचाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः । अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्न मिति पर्यवसितम् । अत्र हेतुमाह– **तद्धि न साध्याभाववदवृत्तित्व** मित्यादि । हि- यतः । साध्याभाववदवृत्तित्वादिरूपम्, **तत्**- अव्यभिचरित त्वम् । **न व्याप्ति** रित्यनुषङ्गेणान्वयः । तथाच साध्याभाववदवृत्तित्वादि रूपाः ये अव्यभिचारपदार्थाः तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्न त्वाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः । नचाप्रयोजकत्वम्, विशेषाभावकूटस्य सामान्याभावव्याप्यताया मवि- वादात् । तत्र साध्याभाववदवृत्तित्वादिरूपाः ये पञ्चाव्यभिचारपदार्थाः तदवच्छिन्नविषयताघटितधर्मावच्छिन्नत्वाभावस्य प्रत्येकसाधकं हेतुं व- क्ष्यति— **केवलान्वयिन्यभावा** दिति । साध्ये अत्यन्ताभावाप्रतियोगित्वा न्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशाया मत्यन्ता न्योन्याभावयोः साध्यतद्वत्त्वावच्छिन्नप्रतियोगिताकत्वभानासम्भवेन प्रति योगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वावच्छिन्नविष- यतायास्तादृशविशेषदर्श्यनुमितिजनकज्ञाने अभावादित्यर्थः । एवञ्च तादृशविषयताशून्यवृत्तित्वमेव अनुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति नासिद्ध्यादिः । ईदृशदिशा अग्रिमहेतवोपि पारि ष्करणीयाः ।

# साध्यवद्भिन्न साध्याभाववदवृत्तित्वम् ,

[दी] अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह— साध्यवद्भिन्ने ति । साध्यवद्भिन्ने य स्साध्याभाव स्तद्वदवृत्तित्वमर्थः ।

दीधितौ अव्याप्ये ति । कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थं अव्याप्ति मिति । तत्र हेत्वधिकरणे एतद्वृक्षादावन्यदेशकालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः । साध्यवद्भिन्नो यस्साध्याभाववानिति कर्मधारये अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तदवृत्तित्वमर्थस्स्यात् , तथासति तद्घटकीभूतस्याभेदसम्बन्धेन साध्यवद्भिन्नीयं यत् तदवृत्तित्वस्यैव लक्षणत्वसम्भवा त्साध्याभाववत्त्वांशस्य वैयर्थ्यापत्तिः, अतस्साध्याभावपदेन साध्यवद्भिन्नपदस्य सप्तमीतत्पुरुषं व्याचष्टे- साध्यवद्भिन्न इति । तथाच साध्यवद्भिन्नवृत्ति र्यस्साध्याभावः तद्वदवृत्तित्व मर्थः, तत्र पूर्ववदभेदेन साध्यवद्भिन्न पदार्थविशेषित धर्म्यवृत्तित्वादेर घटकता, वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांश वैयर्थ्यमिति भावः ।

अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसम्भव इति तद्वारणाय साध्यपदम् । नचाधिकरणभेदेनाभावभेदमत एवैतल्लक्षणकरणात् पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्, अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्ध धर्माध्यासेन भेदस्य लक्षणकर्तुस्सम्मतत्वादाकाशाभावादेर्भेदकाभावेन तस्यैक्यात् । अतएव उक्तधर्माणां भेदकत्वं " एतानि च न भेदकानी " त्यनेन दीधितिकृन्निराकरिष्यति । अथवा साध्याभावपदमनुयोगिताविशेषसम्बन्धेन साध्यीयपरम् , अभावीयविलक्षणानुयोगितालाभाय अभावपदम्, नत्वभावत्वमपि निवेश्यम् , प्रयोजनाभावात् , इत्थं च तादृशविलक्षणसम्बन्धेन यस्साध्यीयः तद्वदवृत्तित्वमित्येवार्थः

तत्र च साध्यस्य यत्पदार्थाविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसम्भवस्स्यादिति तन्निवेशः।

अत्र च साध्याभावस्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः, अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्य धूमवति सत्त्वेन, पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठद्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेन चाव्याप्त्यापत्तेः। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया, अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेः असम्भवस्य, कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताक-साध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्गात्।

अत्र च साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकसम्बन्धेन पर्वतादौ वृत्तेरव्याप्तिः, दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्य आत्मादिषु वृत्तेः घटत्वाभावादिसाध्यकसद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन अधिकरणतायां मानाभावेन चाव्याप्तिः, अतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानम्प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकः तेन सम्बन्धेनाभाववत्त्वं निवेश्यम्; संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणता, कालिकसम्बन्धेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा, समवायादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः। नचैवं वृक्षनिष्ठा या कपिसंयोगाभावीय मूलावच्छिन्नविशेषणता

तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेपि कपिसंयोगवत्ताज्ञानोत्पत्तेः तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थ मिति वाच्यम्, संयोगतदभावयो रविरुद्धत्वज्ञानाभावदशायां वृक्षः कपि संयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्ष निष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकी भूतसंसर्गताश्रयत्वात् ।

केचित्तु — साध्यात्मकाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितम्, स च सम्बन्धो यत्सम्बन्धावच्छिन्नप्रति योगिताकस्वाभाव स्साध्यात्मक स्स इति नोक्तानुपपत्तिः ; अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिहेतुकस्थले कालिक सम्बन्धस्यापि तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपित प्रतियोगितावच्छेदकत्वात् तेन सम्बन्धेन साध्याभाववति काले हेतोर्वृत्ते रव्याप्तिः; नच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशा न्नायं दोषः, कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिक सम्बन्धावच्छिन्नप्रतियोगितायाः घटादावेव सत्त्वात्कालिकसम्बन्धस्य सम वायसम्बन्धावच्छिन्न प्रमेयाभावात्मक स्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्व विरहादिति वाच्यम्; — तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्न प्रतियोगिताको यो ऽभावः तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपित तादृशप्रमेयाभावरूपस्वनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धे अक्ष- ततया अव्याप्तेर्दुर्वारत्वात्; नच यावत्साध्यनिरूपितप्रतियोगिता निवेश नीया, तथाचोपदर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगि- तावच्छेदक कालिकसम्बन्धमादाय न दोष इति वाच्यम्, असमवेतप्रमे- यस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावो ऽत्र नास्तीति प्रत्ययाविषयतया तादृशप्रमेयाभावाभावत्वे मानाभावात् तादृशप्रमेयाभावनिष्ठयावत्प्रमेय निरूपितप्रतियोगित्वाप्रसिध्या उक्तस्थले अव्याप्तितदवस्थ्यात्; नच साध्यता-

वच्छेदकसम्बन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगितायाः निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यम् , सर्वत्र समवायिन्येकया सत्तयैव तादृशप्रमेयाभावाभाववत्ताप्रतीतिनिर्वाहे सर्वसमवाय्यसङ्ग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वात् ;इतिचेन्न ; साध्यतावच्छेदकसम्बन्धेनवृत्तिमद्यत्किञ्चित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशेनोपपत्तेः, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेपि तस्य साध्यतावच्छेदकसमवायसम्बन्धेनावृत्तित्वात् ! नचैवमपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्न प्रतियोगिताको ऽभावः तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम् ; तादृशप्रतियोगितावच्छेदकयत्सम्बन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्सम्बन्धेन तद्वत्त्वस्य विवक्षणीयत्वात् ; उक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन साध्यवद्भिन्ने अवृत्तेः । अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्वानिवेशो विफलः, तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे घटत्वाभावरूपहेतोर्वृत्ते रव्याप्तिप्रसक्तावपि तादृशाव्याप्तेरीदृशविवक्षयैव वारण सम्भवात् , घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदक तादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटे ऽवृत्तेः; नचैवं तादृशसाध्यस्य तादृश सम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एवा प्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यम् , घटभेदस्य घटत्वाभावसमानियतत्वेन तदभिन्नतया घटत्वेपि समवायसम्बन्धावच्छिन्नायास्तादृशप्रतियोगितायास्सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धि सम्भवात् ; तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वपि

घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादव स्थ्यात् ; संयोगिभेदस्य व्याप्याव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावा भेदासम्भवेपि संयोगवत्त्वप्रमाविषयत्वाभावाभेदे बाधकाभावात्स्वरूपसम्बन्ध स्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्याभावस्यप्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तेरनवकाशात् ; इतिचेन्न ; -- प्रतियोगितायां स्वनि-ष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावादौ साध्ये आत्मत्वादिहेतावव्याप्तेर्दुर्वारत्वात् , तादृशसाध्यस्य यः कालिक सम्बन्धावच्छिन्नाभावः दैशिकविशेषणतासम्बन्धावच्छिन्नतदभावस्य तादृश साध्यस्वरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगिता वच्छेदकसम्बन्धत्वात्तेन सम्बन्धेन आकाशाभावरूपसाध्याभावस्य साध्य वद्भिन्नकाले हेतुमति च वृत्तेः । प्रतियोगितायां स्वनिष्ठत्वनिवेशे दैशिक विशेषणतायाः आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसम्ब-न्धत्वविरहेणाव्याप्तेरनवकाशात् । नच साध्यनिरूपितस्वनिष्ठप्रतियोगिता निवेशे साध्याभावपदोपादानवैयर्थ्यम् , अभावान्तरनिष्ठप्रतियोगितायाः स्साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्तेरिति वाच्यम् ; स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्या भाववत्त्वनिवेशप्रौढ्येण तत्पदवैयर्थ्यानवकाशात् । तादृशसम्बन्धेन साध्य वद्भिन्नवृत्तिमत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतोर्वृत्त्या अनु पपत्तेः । इत्याहुः ।

अत्रेदंबोध्यम् ;— साध्यवत्त्वग्रहाविरोधिग्रहविषयसम्बन्धत्वेन साध्य निरूपितप्रतियोगितावच्छेदकसम्बन्धत्वेन वा नानुमित्यौपयिकव्याप्तिशरीरे अभावसम्बन्धनिवेशसम्भवः, साध्यादिभेदेन व्याप्तेर्भेदात् , लाघवेन तत्तत्सा ध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गाणा मेव विशिष्याभावसम्बन्धतया निवेशौचित्यात्, उक्तरूपेण विशेषणताविशेषा-

दीनां सम्बन्धताया अत्यन्तमप्रामाणिकतया तद्रूपावच्छिन्नस्य सम्बन्धि
व्याप्तिघटकत्वायोगाच्च ; परन्तु यादृशसाध्यकस्थले यादृशसम्बन्धो
सम्बन्धतया व्याप्तिघटकः तत्परिचयायैव दर्शितोक्तयः; तथाच
सम्बन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृ
न्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसम्भवादलं वाग्जालेन

साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयम्
"गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वा" दित्यादौ विशिष्टस्यानतिरिक्त
सत्तारूपसाध्याभावस्य गुणादौ सत्त्वेपि न क्षतिः; गुणे गुणान्यत्ववि
सत्ताभावो नास्तीत्यप्रत्ययात् तत्र तादृशाभावत्वविशिष्टाधिकर
नभ्युपगमात् ।

अथैतल्लक्षणे " घटत्वघटाकाशसंयोगान्यतराभाववान् आकाश
दित्यादावव्याप्तिः, घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाव
घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकरणे ग
वृत्तेः; निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वनिवे
वैयर्थ्यादिति चेन्न ; — एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधि
स्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासो ऽभावभेदक इत्ये
युक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यव्याप
साध्यकस्थले ऽव्याप्तिस्समाधीयते, तथा च घटाकाशसंयोगस्यो
तराभावप्रतियोगित्वेपि न तदभावरूपता, तथा सति तादृशविरुद्ध
स्समावेशापत्तेः, तयोर्विरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन
सिद्धेः अव्याप्यवृत्तिसाध्यके सर्वत्रैवाव्याप्तेः; एतदभिप्रायेण लक्ष
स्यावतारणीयत्वादिति गगने अतिरिक्त एव तदभावस्स्वीकरणीय
च न साध्यवद्भिन्नवृत्तिरिति न दोषः ।

# साध्यवत्प्रतियोगिकान्योन्याभावासामा-न्नाधिकरण्यम् ,

[दी] कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह - साध्यव दिति ।

" साध्यवद्भिन्ने वर्तत " इत्यनेन निरवच्छिन्नवृत्तित्वरूपपर्यवसि-तार्थे तात्पर्यात् घटाकाशसंयोगात्मकाभावमादाय न दोष इति तु न श्रद्धेयम् ;—तथा सति सुषुप्त्यादिकालावच्छेदेन अस्मदाद्यात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिः, तत्र साध्यवद्भिन्ने ईश्वरे तादृशसम्बन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञान त्वादिरूपाभावस्य तेन सम्बन्धेन सुखाद्यधिकरणे अस्मदाद्यात्मन्यपि वृत्तेः । उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसम्बन्धावच्छिन्नप्रतियोगिताक सत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च ।

संयोगाभावनिष्ठयोः व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रतियोगि सामानाधिकरण्य प्रतियोगिवैयधिकरण्ययोः वक्ष्यमाणरीत्या न विरोध इत्यभिप्रायेण अव्याप्यवृत्तिसाध्यकस्थले अव्याप्त्या लक्षणान्तरमवतार यति – **कर्मादा विति** ।

इदं त्ववधेयम्;—द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियते, अपि तु कलृप्ततद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगा भावत्वं कल्प्यते, अनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथा-विधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात् ; नच संयोगवत्त्वप्रकारक प्रमाविषयत्वाद्यभावे द्रव्यत्वाभावद्रव्यभेदसंयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यम् , तादृशाभावानां सम-

# सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ,

[दी] हेतोस्साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह— सकले ति । साकल्यं साध्याभाववति साध्ये च बोध्यम् ।

---

नियततया अभेदात् । एवञ्च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयो र्भेद स्सप्रमाण एव । अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः, कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते, अपि तु क्लृप्ततद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाभावस्य गुणादिवृत्तितदभावतो भेदासिद्धेरिति चेत् ?, इष्टमेवैतदधिकरणभेदेनाभावभेदवादिनाम् । नचैवं संयोगाभावत्वकल्पनायां धर्मिणामप्यानन्त्यादुक्तविनिगमकासम्भव इति वाच्यम् , विनिगमनाविरहेणापि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति ।

हेतो रिति । नानाधिकरणकस्येत्यादिः । अव्याप्ते रिति । "एतद्रूपवानेतद्रसा" दित्यादौ एतद्रसाद्यधिकरणे एतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगित्वे प्रतियोग्यवृत्तित्वेन वा भेदे विशेषिते लक्षणगमनसम्भवान्नासम्भवो दर्शितः । साकल्य मिति । बोध्य मित्यस्य विशेषणमित्यादिः । अत्र साध्याभाववति साकल्यविशेषणसत्त्व एव साध्ये तद्विशेषणस्य व्यावृत्तिस्संगच्छते, अन्यथा साध्याभाववत्तायाः हेतुमत्साधारण्येपि साध्याभाववद्यत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवात् । अतः "साध्ये तदभाववतिचे" त्यनुक्त्वा साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितम् । नच साध्याभाववति

साकल्यविशेषणासत्त्वेपि "वह्निमान् पर्वतान्यत्वा" दित्यादौ अतिव्याप्ति वारणमेव साध्ये साकल्यप्रयोजनमस्ति, उभयत्र साकल्यविशेषणादाने यत्किंचित्साध्याभाववति पर्वते हेत्वभावसत्त्वा दतिव्याप्तिः; साध्ये साकल्यविशेषणसत्त्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेन अतिव्याप्त्युद्धारादिति नोक्ताभिप्रायवर्णनं सम्यगिति वाच्यम्;-- साध्याभाववति साकल्यविशेषणासत्त्वे साध्ये साकल्यविशेषणस्योक्तातिव्याप्ति वारणप्रयोजनकत्वसम्भवेपि वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्वएव सङ्गतेः आदौ तत्प्रदर्शनस्योचितत्वात् ।

वस्तुतस्तु;— साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशनरूपकल्पान्तरस्यावलम्बनीयतया चरममेव तत्प्रदर्शनमुचितम्, "साध्ये तदभाववति च बोध्य" मित्युक्त्वा "साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वा अभावो ग्राह्य" इत्युक्तौ 'साध्याभाववति साकल्यं निवेश्यते? साध्याभावो वा एतादृशो निवेश्यते?' इत्येतादृशविकल्पः प्रतीयेत, सच अविवक्षित इति तु सारम् ।

अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे "धूमवान् वह्ने" रित्यादौ साध्यतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव स्यात्, अयोगोळकादेः ह्रदासंयुक्तत्वावच्छिन्नाभावानधिकरणत्वा दित्यतिव्याप्तिः; "वह्निमत्त्वप्रकारकप्रमाविषयो धूमा" दित्यादौ साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्या अव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम् । ननु साध्ये साकल्यविशेषणदानेपि "वह्निमान्

[दी]साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः; न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः।अव्याप्यवृत्ति साध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेः व्यभिचारिणिचा व्याप्यवृत्तावतिव्याप्तेर्वारणाय

---

धूमा" दित्यादौ अव्याप्तितादवस्थ्यम्, पर्वतादावपि पर्वतीयवह्ने र्द्वित्वादिना अभावसत्त्वेन सकलसाध्याभावसत्त्वात्। व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणे च "वह्निधूमोभयवान् वह्ने" रित्यादावतिव्याप्तिः, वह्निमत स्तथाविधसकलसाध्याभावानधिकरणत्वात्। साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मः तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने च लाघवा त्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवाभावे निवेशनमुचितम्, किं साध्ये साकल्यविशेषणेन? इत्यभिप्रेत्य तथैवाह—**साध्यतावच्छेदके** ति। साध्याभाववति साकल्यविशेषणप्रयोजनमाह—**विपक्षे** ति। वैकल्पिकयो स्साध्यतदभावयोः साकल्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयो र्व्यावृत्तिमाह-**नवे** ति। एकव्यक्तिसाध्यके "एतद्रूपवान् एतद्रसा" दित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः, पूर्वक्षणवृत्तित्वविशिष्टैतद्रूपादे रेतद्रसाधिकरणे वृत्तेः। एतद्रूपतद्रूपोभयत्वावच्छिन्नोऽभावोपि न तथा, प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः तत्र लक्षणसंगतेरित्यतो **नानाव्यक्तिके** त्युक्तम्। अतएवाव्याप्तिरेवोक्ता, नासम्भवः। अत्र च नानाव्यक्तिसाध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम्, अतएव "एतद्वृत्तियावद्धर्मवान् एतत्त्वा" दित्यादौ नानाव्यक्तिसाध्यके अव्याप्तिविरहेपि न क्षतिः।

**अव्याप्यवृत्ती** ति। "कपिसंयोगी एतद्वृक्षत्वा" दित्यादावित्यर्थः। **अव्याप्तेर्वारणाये** त्यन्वयः। **व्यभिचारिणिचे** ति। "एतद्वृक्ष

[दी] अभावद्वये प्रतियोगिवैयधिकरण्यं बोध्यम् ।

---

त्ववान् कपिसंयोगा" दित्यादावित्यर्थः । अभावद्वये— साध्याभावे हेत
भावे च । तथाच अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिवारण
साध्याभावे, व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तिवारणाय हेत्वभावे प्र
योगिवैयधिकरण्यमित्यर्थः । यद्यपि हेत्वभावे प्रतियोगिवैयधिकर
विशेषणस्यावश्यकतया "कपिसंयोगी कपिविभागा" दित्याद्यव्या
वृत्तिहेतुके अव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भ
तीति व्याप्यवृत्ती त्यकिञ्चित्करम्, तथापि हेत्वभावे तद्विशेषणप्र
सन्धानं विनैव व्याप्यवृत्तिहेतुकस्थले अव्याप्तिनिर्णयो भवतीत्य
सन्धायैतदुक्तम् ।

प्रतियोगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, अव्या
वृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्या अव्याप्ते
अपि तु प्रतियोग्यनधिकरणवृत्तित्वम् । तथाच प्रतियोग्यनधिकरणवृ
त्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशि
स्सन् वर्तते यो ऽभावः तत्प्रतियोगित्वमित्यर्थः; तेन "कपिसंयोगी एतद
क्षत्वा" दित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितक
संयोगाभावस्य हेत्वधिकरणे सत्त्वेपि नाव्याप्तिः; न वा "एतद्वृक्ष
वान् कपिसंयोगा" दित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध
भावाधिकरणे सत्त्वेप्यतिव्याप्तिः । प्रतियोग्यनधिकरणीभूतसाध्याभाव
धिकरणयावन्निष्ठ स्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलि
ऽर्थः । प्रथमे साध्यतावच्छेदकसम्बन्धेन, चरमे हेतुतावच्छेदकसम्बन्धेन
प्रतियोग्यनधिकरणत्वं बोध्यम्; तेन "अयमात्मा आत्ममहाकालान्य
रत्वा" दित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धे
साध्याधिकरणत्वेपि नातिव्याप्तिः, न वा "वह्निमान् धूमा" दित्या

[दी] हेत्वभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः । तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम् । तेन द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौ नाव्याप्तिः, न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्त्वादौ व्यभिचारिण्यतिप्रसङ्गः ।

---

साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालिकविषयित्वादिसम्बन्धे हेत्वभावप्रतियोग्यधिकरणतासत्त्वेप्यसम्भवो ऽव्याप्तिर्वा । इत्थंच प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वे न निवेशनीये, सम्बन्धान्तरावच्छिन्न प्रतियोगिताकयोः साध्याभावहेत्वभावयोः उक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतया असम्भवातिव्याप्त्योरनवकाशात् ।

**हेत्वभावोपी** ति । अपिशब्देन साध्याभावेपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेशनीयमिति सूच्यते, तेन " विशिष्टसत्तावान् जाते " रित्यादौ हेत्वधिकरणगुणादिषु साध्याभाव प्रतियोगिन स्सत्त्वादे स्सत्त्वेपि नातिव्याप्तिः । अत्र "साध्याभावोपी" त्युक्तौ अग्रिमतत्पदेन हेत्वभावपरामर्शासम्भवः; तत्र हेत्वभावपदोपादानेचाक्षराधिक्यमिति तन्नोक्तम् । **तत्प्रतियोगित्वम्** – साध्याभाववद्वृत्ति अभावप्रतियोगित्वम् । **हेतुतावच्छेदकरूपेण** – हेतुतावच्छेदकावच्छिन्न मित्यर्थः । हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनप्रयोजनमाह - **द्रव्यत्वादा** विति । **विशिष्टसत्त्वे** ति गुणकर्मान्यत्वविशिष्टसत्तेत्यर्थः । प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्व निवेशनस्य फलमाह - **नवे** ति । अत्रापि **द्रव्यत्वादौ साध्ये** इत्यनुषज्यते । **विशिष्टसत्तात्वादिना**- गुणकर्मान्यत्वविशिष्टसत्तात्वादिना तृतीयार्थश्च अवच्छिन्नप्रतियोगिताकत्वम् , तस्यचाभावेऽन्वयः; प्रतियोगिपदार्थैकदेशप्रतियोगित्वान्वितमवच्छिन्नत्वं वा तदर्थः । **तादृशाभावे** ति

[ दी ] यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र

---

सकलसाध्याभाववन्निष्ठाभावेत्यर्थः । नच हेत्वभावे प्रतियोगितावच्छेद वच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव नि श्यताम्, ततोपि तत्प्रयोजननिर्वाहात्; तथाच "द्रव्यं सत्त्वा" दित्या विशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैव अ व्याप्तिवारणसम्भवात् प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेश मफलमिति वाच्यम्; हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सक साध्याभाववन्निष्ठा या हेतुतावच्छेदकावाच्छिन्नानधिकरणवृत्तित्वविशि निरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्व मर्थस्स्यात्, तदपेक्षः सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्न यादृशप्रतियोगित वच्छेदकावच्छिन्नानधिकरणता तद्रूपस्वरूपास्मदीयफलितार्थस्यागुरुत्वात् नच ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्ध वत्त्वमित्यर्थः, सचातिलघुरिति वाच्यम्; एतादृशार्थकरणे मूलोक्तं प्रति योगितायाः व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्था सरणात् उक्तविशेष्यविशेषणभावेन निवेशे व्यर्थविशेषणतानवकाशात्

एतल्लक्षणं दूषयित्वा उत्तरलक्षणमवतारयति— **यत्रैकव्यक्तिक** मिति । यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः । "एतद्रूपवानेतद्घसा दित्यादावव्याप्तिरित्यर्थः । अनेकाशेषत्वरूपसाकल्यस्य साध्ये असत्त्व दिति भावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणा न तत्रतद्दोषावकाश इत्यत आह- **विपक्षो** वे ति । **विपक्षः** - साध्याभा वान् । अत्रा प्यैकव्यक्तिक मित्यस्य विपरिणतस्यानुषङ्गः; तथाच "तद्घः भिन्नं पटत्वा" दित्यादौ साध्याभाववति तद्घटादौ साकल्याप्रसिद्धच अव्याप्तिरित्यर्थः । सकलशब्दस्याशेषमात्रपरत्वे दोषमान्तरमाह —

**साध्यवदन्यावृत्तित्वंवा; केवलान्वयिन्यभावात् ।**

निर्धूमत्वव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौचाव्याप्तिः, तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादतआह— **साध्यव** दिति ।

**निर्धूमत्वव्याप्य** इति । **तत्त्वेन**– निर्धूमत्वव्याप्यत्वेन । तथाच "धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावा" दित्यादावित्यर्थः । निर्धूमत्वत्वावच्छिन्ने साध्ये एकव्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणम् । निर्धूमत्वव्याप्यस्य ह्रदत्वादे स्तादूप्येण साध्यतायां सद्धेतुत्वानुपपत्तिः, अत स्तत्त्वेने त्युक्तम् । हेत्वभावस्ये ति । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेपि सकल तन्निष्ठवह्न्यभावाद्भेदप्रतियोगिता मादायैव लक्षणं सङ्गमनीयम् , हेतु तावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि सम्बन्धा न्तरावच्छिन्नप्रतियोगिताकहेत्वभाव मादायातिप्रसङ्गानवकाशेन हेत्वभाव प्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशात् ।

यत्तु वह्निमद्भेदहेतुताभिप्रायकोयं ग्रन्थः, तत्र हेतुभेदमादायापि लक्षणगमनाऽसम्भवः, भेदभेदस्यानवस्थाभयेन अधिकरणस्वरूपतया तस्य च प्रत्येकं विश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवादिति; तन्न;- आकाशाभावाद्यधिकरणकभेदभेदस्याकाशाद्यभावास्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात् । नचेदृशरीत्या आकाशाभावमादाय भेदहेतुकव्यभिचारिण्यतिव्याप्तिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयम् , तथासत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः, एवञ्चाकाशाभावमादाय नोक्ताव्याप्तिपरिहारसम्भवइति वाच्यम् ; उक्तस्थले आकाशाभावस्य

हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहादेवाऽतिव्याप्तिवारण
म्भवेन एतादृशविवक्षाया निष्प्रयोजनकत्वात्; वह्निमद्भेदहेतुकस्थले
साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेन आकाशाभाव
हेतुभेदस्य प्रतियोगिव्यधिकरणत्वेन अव्याप्तिवारणसम्भवादिति चेत्;

अत्र केचित्;—यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं सा
वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुः, तत्र वह्न्यभावस्यापि स
साध्याभाववदन्तर्गततया तत्र वह्न्यभावभेदासत्त्वेन तमादाय लक्ष
गमनासम्भवात् । न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य स
साध्याभाववन्निष्ठत्वासम्भवेपि अखण्डस्य विशिष्टात्यन्ताभावस्य तथ
मादायैव लक्षणं सङ्गमनीयमिति वाच्यम्;— प्राचीनमते विशिष्टाभाव
विशेष्याभावविशेषणाभावाभ्या मनतिरिक्तत्वेन तादृशविशिष्टाभावस्य वह्
भावत्ववह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात् । अथैवम
विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याख
तया सकलधूमवन्निष्ठतया तमादायैव लक्षणं सङ्गमनीयमिति चेन्न;-
वृत्त्यनियामकतया विषयितादिसम्बन्धाना मत्यन्ताभावप्रतियोगितानवच्
दकत्वात् । संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभ
द्यभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेपि तदभावप्रतियोगिता न हेतु
वच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना, तत्र लाघवेनाभावत्वस्यैवावच्छेद
त्वादिति न तमादायापि लक्षणसङ्गतिः । नच गुरुधर्मावच्छिन्नहेतु
स्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेद
निवेश्यम्, तथाच वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवे
वाच्यम्;— एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्
पारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेणैव तद्दोषदानादिति वदन्

तदसत्;—

तथासत्यपि सकलसाध्याभाववन्निष्ठकालिकसम्बन्धावच्छिन्न प्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात्। नच जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावसत्त्वात् तत्र तत्सम्बन्धेन तदभावो न वर्त्ततएवेति वाच्यम्; कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेपि प्रतियोग्यनधिकरणीभूतवह्निमद्देशा वच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात्; एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्या मनतिरिक्तत्वे "द्रव्यं विशिष्टसत्त्वा" दित्यादावेवाव्याप्तिसम्भवे तदुपेक्षायाः निर्बीजत्वाच्च। एतेन "विशेषणताविशेषसम्बन्धेन वृत्तिघटितसामानाधिकरण्यसम्बन्धा-वच्छिन्नप्रतियोगिताकधूमाभावव्याप्यवान् तादृशसामानाधिकरण्यसम्बन्धा-वच्छिन्नप्रतियोगिताकवह्न्यभावा" दित्येतत्परम्; तत्र धूमसामानाधिकरण्य रूपस्य सकलसाध्याभावस्याधिकरणं हेतुरपि, तस्य धूमाधिकरणे सत्त्वात् तत्र च हेतुभेदमादायापि न लक्षणसमन्वयसम्भवः; अत्यन्ताभावमादाय तदसम्भवो दर्शितरीत्या ऽवसेयः। इत्थञ्च विशिष्टाभावस्य विशेष्या भावविशेषणाभावाभ्या मतिरिक्तत्वेपि न दोषासङ्गतिरिति परास्तम्; तत्रापि कालिकसम्बन्धावच्छिन्नाभावमादाय दोषवारणसम्भवात्। तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रयियोगिवैयधिकरण्यं निविष्टम्, प्रति योगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वेन निविष्टेत्यभिप्रायेणैवैतद्दोष दानम्। हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यप्रवेशेत्वग्रिमलक्ष-णापेक्षया गौरवमेवैतल्लक्षणपरित्यागे बीजं बोध्यम्।

एतेन सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूता भावप्रतियोगित्वमेवैतल्लक्षणनिष्कृष्टार्थः, "धूमवान् वह्ने" रित्यादौ प्रमेय त्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेपि न क्षतिः, यद्रूपावच्छिन्न

प्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्ष णत्वात्; एवंच हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते, व्याप कतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्व भावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वाभावेनाति- व्याप्तिविरहात् । व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाव वन्निष्ठत्व मभावे निवेश्यम्, तेन वह्न्याद्यभाववति कालिकादिसम्बन्धेन धूमाद्यात्मकाभावस्य वृत्तावपि धूमाभावादे र्नसाध्याभावव्यापकताक्षतिः । "सत्तावान् जाते" रित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिध्या अव्याप्तिस्तु लक्षणपञ्चकएव दोषः । अस्तु वा हेतुताव- च्छेदकसम्बन्धेन हेतुमत्ताज्ञानंप्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकः तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत्स्वं तत्तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्थंच "सत्तावान् जाते" रित्यादावेतादृशं स्वं जातित्वाभावत्वादिकमेव, त- द्भिन्नञ्च जात्यभावत्वमिति लक्षणसमन्वयः । इत्थञ्च "एतद्वृक्षत्ववान् कपिसंयोगा" दित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिध्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसंयोगाभावत्वस्य साध्याभाव व्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यं देयमेव, न देयमेववा ऽधिकरणत्वाभावस्यैव अधिकरणभिन्नत्वस्थाने निवेश नीयत्वात् कपिसंयोगाभावादेरिव तदधिकरणताया अप्यव्याप्यवृत्तितया तद भावस्य साध्याभाववति सत्वेनातिव्याप्त्यनवकाशात्; अधिकरणत्वाभा- वादिश्च भावप्रतियोगिकतया अतिरिक्तएवेति विशेषणताविशेषेणैव त- द्वृत्त्वं साध्याभाववति विशेषणीयमिति । एवञ्च "निर्धूमत्वव्याप्यवान् निर्वह्नित्वा" दित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्ति त्वेपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वान्नाव्याप्तिरिति पूर्वपक्षो-

[दी] अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्; न हि भवति "नीलो घटो घटादन्य" इति ।

---

प्यकिञ्चित्करः, यत्र यावतां साध्याभाववतां सम्भव स्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकम्, न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैव एतद्दोषदानात्, प्रकारान्तरानुसारेण परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादितिकृतं पल्लवितेन ।

साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति— **अत्रे** ति । **साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्व** मिति । साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः । तेन "वह्निमान् धूमा" दित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः, तादृशभेदप्रतियोगितावच्छेदकतायाः तत्त्वविशिष्टवह्निमत्त्वएव पर्याप्तत्वात् । **व्युत्पत्तिबललभ्यम्**— अन्यादिपदसमभिव्याहारलभ्यम् । नञ्पदसमभिव्याहारज्ञानस्येव तादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दबुद्धित्वावच्छिन्नंप्रत्येव जनकत्वादिति भावः। **व्युत्पत्तिबललभ्य** मित्यनेन यथाश्रुतलक्षणवाक्यार्थएवायमिति सूचितम् । तादृशसमभिव्याहारस्थले तत्प्रतियोगिकाभावमात्रबोधे अतिप्रसङ्गं सूचयति— **नहि भवती** ति । "प्रामाणिकव्यवहार" इति शेषः । तथाच अन्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोपि स्यादिति भावः । एवं "द्रव्यं न घट" इत्याद्यप्रयोगादनुयोगितावच्छेदकावच्छेदेनैव अन्योन्याभावादि रन्यादिपदेन प्रत्याय्यते, अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्मइति प्रकाशकृदङ्गीकृत *व्युत्पत्तिविरोधात् "घटो घटादन्य" इति प्रयोगवारणसम्भवात् **नील** इति ।

"घटादन्य" इत्यादौ प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः, तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः

---

* "व्युत्पत्त्यनुरोधात्" इति पाठान्तरम् ।

अथवा केवलमाधेयत्वमेव घटस्य सम्बन्धः, धर्मिपारतन्त्र्येण घटत्वादे रप्यवच्छिन्नत्वसम्बन्धेन तत्रान्वयोपगमात् ; एकत्र विशेषणत्वेनोपस्थितस्या प्यन्यत्र पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात्, प्रतियोगित्वस्य च व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशभेदे निरूपकतासम्बन्धेनान्वयः । " घटान्य " इत्यादौ निरूपकतासम्बन्धेन घटत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदार्थः, तत्पुरुषे पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्ट लाक्षणिकत्वात्; तादृशघटादिपदार्थस्यचाभेदसम्बन्धेन भेदे ऽन्वयः । नवीनमतेच " घटादन्य " इत्यादौ अनुयोगिता पञ्चम्यर्थः, तत्र प्रकृत्य र्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्ननिरूपकताकत्वसम्बन्धेनान्वयः; अनुयोगितायाश्च आश्रयतासम्बन्धेन भेदे ऽन्वयः, समासस्थले च घटत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा, तस्यचाभेदसम्बन्धेन भेदे ऽन्वयः ।

अथैवं **साध्यवदन्यावृत्तित्व** मित्येतादृशलक्षणवाक्यादभेदसम्बन्धेन तादृशप्रतियोगिताविशिष्टविशेषितः तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदः तद्वदवृत्तित्वमेव प्रतीयते, तथाचानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधाने अर्थान्तरप्रसङ्गः, तादृशप्रतियोगिता सम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिता ज्ञानस्यैव लाघवेन अनुमितिहेतुत्वादिति चेन्न;– यादृशव्याप्तिज्ञान मनु मितिहेतु स्तस्यामेवास्य तात्पर्यात्, तस्या श्शाब्दबोधाविषयत्वेपि तन्मूलकोदीच्यतादृशव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाह्यत्वात्, तादृशशाब्दबोधस्यापि कथञ्चिदुपपादयितुं शक्यत्वाच्च । " नीलो घटः कम्बुग्रीवादिमदन्य " इत्यादिवाक्यस्याप्रामाण्यात् " पटः कम्बुग्रीवादिमदन्य " इत्यादिवाक्यस्य प्रामाण्यादन्वयितावच्छेदकनिरूपितं पारि भाषिकमवच्छिन्नत्वं प्रतियोगितायां भासतइत्युपेयम्, अतः **साध्यवदन्य**

इत्यादौ मतुबन्तप्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतया अनवच्छेदकत्वेपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः ।

पारिभाषिकं तदवच्छिन्नत्वंच तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम् ; एतादृशावच्छिन्नत्वस्य सम्बन्धतया निवेशात् प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेपि न क्षतिः; सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात्। अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगितावगाहिज्ञानमेव कारणं कल्प्यते लाघवात्, न तु साध्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमिति अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते । "कम्बुग्रीवादिमद्वान् घटात्" इत्यादौ विशेषदर्शिना मनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेव अनुमित्यौपयिकव्याप्तिघटकम्, तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकसमशीलतावादिनस्तु स्वरूपसम्बन्धरूपावच्छिन्नत्वमेव व्याप्तिशरीरे निवेशयन्तीति समासः ॥ .... *

# इति पञ्चलक्षणी समाप्ता ।

# नापि साध्यसामानाधिकरण्यानधिकरणत्वम्,

**नापी** ति । साध्यमसमानाधिकरणं यस्य, यदधिकरणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्,

साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे यदि तदधिकरणावृत्ति रूपासामानाधिकरण्यं निवेश्यते, तदा "द्रव्यं सत्त्वा" दित्यादावतिव्याप्ति सत्तायाः द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वे अनन्तरवक्ष्यमाणलक्ष भेदः इत्यतो व्याचष्टे— **साध्य** मिति । **असमानाधिकरणं** य त्यत्र असमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे "द्रव्यं सत्त्व दित्यादावतिव्याप्तिः, द्रव्यत्वादे स्सत्ताद्यनधिकरणाधिकरणकत्वविरहेण त्पदेन सत्त्वादेरुपादानासम्भवात् । "सत्तावान् द्रव्यत्वा" दित्याद व्याप्तिश्च, सत्त्वादेर्द्रव्यत्वाद्यनधिकरणाधिकरणकत्वात् । अतः तदधिकर नधिकरणपरतया तत्पदं व्याचष्टे — **यदधिकरणे** ति । यदधिकर नधिकरणं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैक रूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाहः, यत्त्वतत्त्वा गमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया गौरवञ्चेत्याशयेन य तत्त्वाघटितं साध्यासामानाधिकरण्यपदार्थमाह— **साध्यनिष्ठे** ति । सा निष्ठं यदसामानाधिकरण्यं स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वाभावः स्प्रतियोगित्वञ्च तत्प्रतियोगिकोटिनिविष्टाधिकरणवृत्तित्वम् ; साध्यनि भावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं वृत्तित्वमिति यावत् । "वह्निमान् धूमा" दित्यादौ साध्यनिष्ठाभावो ह धेयत्वाभावः, तदीयप्रतियोगितायामुक्तसम्बन्धेन अवच्छेदको ह्रदा तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः ।

[दी]साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमितियावत् ; तदनाधिकरणत्वमित्यर्थः । साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वा-

---

अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम् , अन्यथा " वह्निमान् धूमा " दित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायाऽनुपपत्तेः । तथाच "सत्तावान् समवायित्वा" दित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकीभूताधिकरणाप्रसिध्द्या - अव्याप्तिः, " वह्निमान् धूमा " दित्यादावपि धूमादेरयोगोळकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगितावच्छेदकपर्वतादिवृत्तित्वादव्याप्तिश्च । साध्यतावच्छेदकव्यापकीभूताभावनिवेशे च गौरवमित्याशयेन फलितार्थमाह— **साध्यनिष्ठाधेयत्वे** ति । अनिरूपकत्वमिह साध्यनिष्ठाधेयतात्वावच्छेदेन विवक्षणीयम् , तेन " वह्निमान् धूमा दित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयत्वानिरूपकत्वेपि नाव्याप्तिः ।

एवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाऽऽधेयता निवेशनीया, तेन " आयमात्मा आत्ममहाकालान्यतरत्वा " दित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वनिष्ठाधेयतानिरूपकत्वेपि नातिव्याप्तिः । तादृशाऽऽ**धेयत्वानिरूपके** त्यत्राधिकरणत्वमविवक्षितम्, तदनिरूपकत्वमात्रं निविष्टम् । प्रथमतो " द्रव्यं सत्त्वा " दित्यादावतिव्याप्तेराशङ्किततया व्यभिचारिसामान्यएवातिव्याप्तिमुद्धरति— **साध्यवद्भिन्नस्ये** ति । व्यभिचारनिरूपकाधिकरणस्येत्यर्थः । अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन वाच्यम् , अन्यथा " वह्निमान् धूमा " दित्यादौ साध्यनिष्ठाधेयत्वानिरूपकस्वावयवादौ धूमादे स्समवायेन वृत्तेरव्याप्त्यापत्तेः । इत्थञ्च " सत्तावान् द्रव्यत्वा " दित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मकसमवायादिना वृत्तेरप्रसिद्धेः

[दी] तद्वृत्तौ नातिप्रसङ्गः । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्व व्यापकाभाव प्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः ।

---

एवं " द्रव्यं विशिष्टसत्त्वा " दित्यादावपि विशिष्टसत्तादे स्सत्ताद्यनति रिक्ततया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वा सम्भवात् अव्याप्तिरित्यतो निष्कृष्टार्थमाह— साध्यनिष्ठे ति । अत्रापि पू दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाऽऽधेयत्वं निवेशनीयम् एवमधिकरणत्वमप्यविवक्षितम् , तादृशाधेयत्वनिरूपकत्वव्यापकतैवाऽभा निवेशनीया; तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे " धूमवान् वह्ने " रित्यादौ वह्न्यधिकरणत्वसामान्याभावस्य धूमनिष्ठाधेयत्वानिरूपकह्रदादि वृत्तित्वादतिव्याप्तिरित्यतो व्यापकतानिवेशः । व्यापकत्वञ्च तद्वन्निष्ठ न्योन्याभावप्रतियोगितावच्छेदकत्वम् , न तु तद्वन्निष्ठात्यन्ताभावप्रतियोगि त्वम् , सर्वस्यैव तथाविधद्वित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः न वा तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् , तादृशाभा प्रतियोगितानवच्छेदकीभूताभावत्वादिक मादाय वह्न्यधिकरणत्वसामान्या भावस्यापि धूमानधिकरणत्वव्यापकतयाऽतिव्याप्त्यापत्तेः । अनवच्छेद कत्वञ्चावच्छेदकतापर्याप्त्यनधिकरणत्वम् ; अत उभयवद्भेदमादाय दोषः । अथवा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूपक वृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकं तत्त्वमेव समुदायार्थः; अतोऽभा त्वादिना व्यापकत्वमादाय न दोषः ।

अधिकरणता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या; ते " वह्निमान् धूमा " दित्यादौ वह्न्यनधिकरणधूमावयवादौ धूमाधिक रणत्वसामान्याभावासत्त्वेपि न क्षतिः । " धूमवान् वह्ने " रित्याद यत्किंचिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतया अतिव्या

# साध्यवैयधिकरण्यानधिकरणत्वं वा,

तेन "सत्तावान् द्रव्यत्वा" दित्यादौ न दोषः । साध्यवैयधिकरण्यम्- साध्यवद्भिन्नाधिकरणत्वम् ।

---

वारणाय सामान्यपदम् ; तथाच तादृशाधेयत्वानिरूपकत्वव्यापकाभाव प्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वमिति फलितार्थः । तेन धूमानाधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगितायाः वह्न्यधिकरणत्वसामान्यनिष्ठत्वेपि नातिव्याप्तिः । यदधिकरणतामात्रनिवेशे "द्रव्यं विशिष्टसत्वा" दित्यादावव्याप्तिः, द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वात् ; अतो यद्रूपावच्छिन्ने ति । हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसम्बन्धेन तद्वन्निष्ठत्वं निवेश्यम्, अन्यथा "वह्निमान् धूमा" दित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसम्बन्धेन वृत्ते रव्याप्त्यापत्तेः, तथासति "सत्तावान् द्रव्यत्वा" दित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः ; अतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव लक्षणं कृतम् ; तथाचाधिकरणतायाः विशेषणताविशेषेण वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यम्, अतो न दोषः ।

पूर्वकल्पपरित्यागे बीजमाह— तेने ति । न दोष इति । सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्सम्बन्धावच्छिन्नायाः द्रव्यत्वाधिकरणतायाः द्रव्ये प्रसिद्धायाः अभावस्य साध्यानधिकरणत्वव्यापकत्वादिति भावः ।

# तदुभयमपि साध्यानधिकरणानधिकरणत्वं

चरमाधिकरणत्वांशस्या ऽनतिप्रयोजनकतया तमपहाय द्वयमेकोक्त्या ऽनूद्य दूषयति-- **तदुभयमपी** ति । **साध्ये** त्यादेः साध्यं यदधिकरणानाधिकरणं तत्त्वाभावः,

---

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पौनरुक्त्यमतस्तद्व्याचष्टे—**साध्ये** ति । ननु मूले **तदुभयमपि साध्यानधिकरणानधिकरणत्व** मित्यनेनोक्तलक्षणद्वयानुवादो ऽसङ्गतः, असामानाधिकरण्यवैयधिकरण्ययो रधिकरणताद्वयघटितत्वेन तादृशलक्षणयो रधिकरणतात्रयघटितत्वानुवादेच अधिकरणताद्वयमात्रस्य निवेशादित्यतो मूलं सङ्गमयति– **चरमाधिकरणत्वांशस्ये** ति । **अनतिप्रयोजनकतये** ति । अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तेरिति भावः । असामानाधिकरण्याद्यधिकरणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमि त्यनतिप्रयोजनकतये त्युक्तम् । **तदपहाय** – चरमाधिकरणत्वांशं परित्यज्य । **द्वयम्**– साध्यासामानाधिकरण्याभाव साध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयम् । **साध्यानधिकरणानधिकरणत्व** मित्यनेन "सत्तावान् द्रव्यत्वा" दित्यादावव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादकता ऽनुपपन्नेति यथाश्रुतार्थानुवादपरतया सङ्गमयितु मनुवदनीयलक्षणार्थद्वयमाह-- **साध्येत्यादे** रिति । लक्षणद्वयस्य "क्रमेणे" ति शेषः । **तत्त्वाभाव** इत्यन्तेन प्रथमलक्षणार्थकथनम् ; एवञ्च साध्याधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते; तदुत्तरत्व प्रत्ययेन तत्त्वं साध्यपदोत्तरसान्निविष्टनञा तदभावः प्रत्याय्यतइति प्रथम लक्षणार्थबोधकत्वं **साध्यानधिकरणानधिकरणत्व** मित्यस्य । नच

साध्याधिकरणानधिकरणत्वपदेन नञ्समासे सत्येव तदर्थाभावो नञा प्रत्याययितुं शक्यते, तथाच साध्यादौ नञ्निपातोऽसम्भवी, समस्य मानपूर्वनिपतितस्यैव नञस्साधुत्वात्; अन्यथा "अचित्रगु" रित्यादौ चित्रादि पदोत्तरमपि नञ्निपातापत्तेरिति वाच्यम्;— ससम्बन्धिकार्थबोधकोत्तर पदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि सा-धुत्वसम्पादकत्वात्; अन्यथा " घटानधिकरणत्वं साध्याभाववदवृत्तित्व " मित्यादौ घटाधिकरणत्वाभावसाध्याभाववदवृत्तित्वाभावप्रत्ययानुपपत्तेः । न हि तत्रानधिकरणत्वादिपदानां घटादिपदैस्समासे तादृशार्थप्रतीति रुप पद्यते, अनधिकरणत्वपदादिजन्यप्रतीतिविशेष्यीभूताभावेन सममेव घटादि संसर्गभानात्, समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्था-न्वये राजपुरुषादन्यइत्यर्थे " राजा पुरुष " इत्यादिसमासापत्तेः । एवं नञा अन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनादधिकरणसामान्यभेदवा नेवानधिकरणपदार्थस्स्यात्, तस्यचाप्रसिध्द्या नञ्पदाधिकरणपदयोः प्राथ मिकसमासासम्भवाच्चेति ।

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपः प्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वशब्देन प्रतिपाद्यते । तथाहि— आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेन अधिकरणा नधिकरणपदेन अधिकरणमनधिकरणं आधेयत्वानिरूपकंयस्येति व्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावत्त्वेनाऽन्यपदार्थो बोध्यते; बहुव्रीहौ विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नस्य बोधः तद्विपरीतविशेषणविशेष्यभावापन्नस्य समासेन प्रत्ययात् । " चित्रा गौर्यस्ये " ति विग्रहवाक्यात् यत्पदार्थसम्बन्धित्वेन चित्रगोः " चित्र गु " रित्यतः चित्रगोनिष्ठसम्बन्धप्रतियोगित्वेन यत्पदार्थस्य बोधात्, प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेद-

**तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधि करणे धूमेचाप्रसिद्धम् ॥**

---

साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः । तत्र– केवला न्वयिनि । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाऽप्रसिध्द्या

---

वत्त्वेनाधिकरणप्रतीतेः । एवञ्च साध्यं यस्याधिकरणानधिकरणं यदधि करणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्याधिकरणा नधिकरणत्वशब्देन प्रत्याय्यते, तदभावस्साध्यपदोत्तरनञ्पदघटिततद्वा-क्येनेति ।

द्वितीयलक्षणार्थमाह– साध्यस्ये ति । तथाच साध्यानधिकरणमधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते, तदभावो द्वितीयनञेति उक्तशब्दस्य एतदर्थानुवादकतेति भावः ।

पूरणसंवलितं तत्रे ति ग्रन्थं व्याचष्टे— तत्रे त्यादिना । मूले केवलान्वयिनि "वह्निमान् धूमा" दित्यादौचाव्याप्तौ हेत्वकथनात् प्रथम लक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति— साध्ये त्यादिना अप्रसिध्द्ये त्यन्तेन । साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेण इयमप्र सिद्धि रभिहिता, यत्किञ्चिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेःरव्याप्तिर्बोध्या । वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेष्व व्याप्तिसत्त्वात् धूममात्रे तत्कथनं मूलकृतो न्यूनतासम्पादकम् , अतो

[दीं]नानाव्यक्तिसाध्यके चैकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः, क्वचिद्व्यभिचारिण्यतिव्याप्तिश्चाऽऽद्ये; द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितः, तदा

---

**धूम** इत्यस्य उपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे— **नानाव्यक्तिके** ति । अत्र च यथासम्भव मव्याप्तिर्बोध्या; तेन " एतद्वृत्तियावद्धर्मवानेतत्त्वा " दित्यादौ वक्ष्यमाणरीत्या ऽव्याप्तिविरहेपि **न क्षतिः** । अतएवा ऽग्रे **नानाधिकरणके सर्वत्रे** ति वक्ष्यति । यद्वा **नानाव्यक्तिसाध्यक** इत्यस्य मिथो व्याधिकरणद्वयवृत्तिसाध्यतावच्छेदकक इत्यर्थः । अत्राव्याप्तौ हेतुं पूरयति— **एके** त्यादिना **इती** त्यन्तेन । अनया रीत्या अव्याप्तिश्च यत्किञ्चित्साध्यनिष्ठाधेयत्वानिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण ; साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरेव दोष इति ध्येयम् ।

**क्वचि** दिति । " पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वा " दित्यादौ । **अतिव्याप्ति** रिति । विशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकितया पृथिव्यादे स्साध्यनिष्ठाधेयत्वानिरूपकत्वासम्भवादिति भावः । आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशे नैष दोषः, अधिकरणतानिरूपकतावच्छेदकस्यैवाऽऽधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादेः पृथिवी निरूपिताधेयताऽनवच्छेदकत्वादिति भावः ।

द्वितियलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे धूमादौ नाव्याप्तिः, अतस्तत्कल्पे केवलान्वयिसाध्यकाव्याप्तिरेव, यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशे च उभयस्थलएवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति— **द्वितीयेचे** त्यादिना । **साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदः साध्यवैयधिकरण्ये विवक्षितः**— साध्यवैयधिकरण्यघटकतया

[दी] केवलान्वयिनि, यदि यत्किंचित्साध्यव्यक्तिभेदो वि
तदा नानाधिकरणसाध्यके सर्वत्राऽव्याप्तिः ॥

---

विवक्षित इत्यर्थः । केवलान्वयिनि— केवलान्वयिन्येव । न
णके ति । एकव्यक्तिसाध्यकेपि " सत्तावान् द्रव्यत्वा " दित्य
साध्यवतो भेदस्य अन्यस्मिन् साध्यवति सत्त्वादव्याप्तेः,
साध्यकेपि " एतद्वृत्तियावद्धर्मवान् एतत्त्वा " दित्यादौ
सम्भवाच्च " नानाव्यक्तिकेति " नोक्तम् ; तथाच द्वित
प्रायेण धूम इति मूलं नानाधिकरणसाध्यकसामान्योपलक्षकमि

## इति सिंहव्याघ्रलक्षणे समाप्ते ।

# अथ सार्वभौमपरिष्कारः ।

[दी] केचित्तु;- साध्ये ति । साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वस्याभावः तदधिकरणभिन्नत्वमर्थः;

---

साध्यासामानाधिकरण्यानधिकरणत्व मित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेपि "द्रव्यं सत्त्वा" दित्यदावतिव्याप्ति र्नसम्भवति, सामानाधिकरण्यस्याऽव्याप्यवृत्तितया सत्तादावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्त्वात्; किन्तु "वह्निमान् धूमा" दित्यादावव्याप्तिः, स्वावयवाद्यवच्छेदेन धूमादावपि वह्न्यादिसामानाधिकरण्याभावसत्त्वात्; सापि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत् तदवच्छिन्नत्वेनाऽभावं विशेष्य वारयितुं शक्यतइत्यभिप्रायेण तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति— केचित्त्वि ति ।

हेत्वधिकरण इति। सप्तम्यर्थो ऽभावान्वय्यवच्छिन्नत्वम् । तेनैव सम्बन्धेने ति तृतीयार्थोपि वृत्त्यन्वितमवच्छिन्नत्वम्; वृत्तिपदस्य सम्बद्धार्थकत्वे तु अभेदएव तदर्थः । अनधिकरणत्वपदस्य अधिकरणत्वाभावः अभावमात्रं वा यद्यर्थस्स्यात् ? तदा अव्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तितया सत्तादौ द्रव्याद्यवच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतया तदभावस्यचाऽक्षतत्वा दतिव्याप्ति स्तदवस्थैवेत्यनधिकरणपद माधिकरणभेदवदर्थकतया व्याकरोति— तदधिकरणाभिन्नत्व मिति । यद्यपि अधिकरणभेदेनाऽभावभेदाभावात् संयोगादिना धूमाद्यधिकरणपर्वताद्यवच्छिन्नो य स्सम्बन्धान्तरेण तद्वृत्ति रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावः तस्यैव स्वावयवाद्यवच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटम्, तथापि तादृश

[दी] तेन धूमस्य स्वावयवे संयोगेन

---

हेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः ; " रूपे पर्वते न वह्निमत्संयुक्तत्व " मिति प्रतीतिवत् " पर्वते धूमे न वह्निमत्संयुक्तत्व " मिति प्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्ट निरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणतायाः रूपादावेवो पगमात् । अभावाधिकरणतायामेवयाऽधिकरणविशेषावच्छिन्नत्वं निवेश नीयम्, तावतापि धूमरूपयोः अभिन्नस्याप्यभावस्य परस्परानवच्छेदका वच्छिन्नाधिकरणताभेदेन कथितदोषनिराकरणसम्भवात् ।

उभयत्र हेतुतावच्छेदकसम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति— **तेने** ति । **स्वावयवे संयोगेनावृत्तावपी** त्यन्वयः । तथाच स्वावयवा द्यवच्छेदेन साध्यवत्संयुक्तत्वासत्त्वेन तदभावस्याऽक्षततया प्रथमतो हेतुता वच्छेदकसम्बन्धानिवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वा-भावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य यत्नासि र्नस्यादिति भावः । यद्यपि तादृशसम्बन्धनिवेशेपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाव वृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वादव्याप्तितादव-स्थ्यम्, तथापि " इदानी " मिति प्रतीतिनियामकात्कालस्यावच्छेदक-त्वात् " इहे " ति प्रतीतिनियामकदेशनिष्ठावच्छेदकतायाः वैलक्षण्यं दुरपह्नवम्, यदभावात् " पर्वते धूमे न वह्निमत्संयुक्तत्व " मिति प्रत्ययाभावः हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेव निवेश्यम्. अतो न दोषः । नच कालोपाधेरवच्छेदकताया मवच्छेद्याधिकरणेनाऽवच्छे दकस्य कालिकसम्बन्धो नियामकः, इत्थञ्च तादृशसम्बन्धानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यम्, अन्यस्य दुर्वचत्वात् ; तथाच व्यभि चारिणि कालिकादिसम्बन्धेन हेतौ वर्तमाने साध्यसामानाधिकरण्याभावे

[दी] वह्निमति च

व्यभिचारनिरूपकाधिकरणीयावच्छेदकतायां कालिकसम्बन्धानवच्छिन्नत्व विरहादतिव्याप्तिरिति वाच्यम्;— कालिकव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वादिसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात्, कालविधया तस्यावच्छेदकत्वे तादृश सामानाधिकरण्यस्य कालिकाव्याप्यवृत्तितापत्तेः, कालिकसम्बन्धानवच्छिन्नत्वाद्दन्यस्यैव वैलक्षण्यस्य देश विधयावच्छेदकतायां स्वीकरणीयत्वात् ।

**हेत्वाधिकरण** इत्यत्र हेतुपदं अधिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम्, अतो धूमाद्यन्तरसंयुक्तस्वावयवावच्छेदेन धूमादेस्तादृशाभाववत्त्वेपि न क्षतिः। एवञ्च व्याप्तेः प्रतिधूमादिकं भिन्नत्वेपि केनापि रूपेणाऽनुगतानांतासां धूमत्वादिकमवच्छेदकम् ।

यत्तु;—हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव, हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना या या अधिकरणता तदन्यत्वेन साध्यसामानाधिकरण्याभावाधिकरणतायाः विशेषणीयत्वान्नोक्तदोषः, नवाऽननुगमः; एवञ्च कालोपाधिविधया हेत्वधिकरणस्य देशस्यावच्छेदकत्वेनोक्तदोषस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसम्भवः ; पर्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठानिरुक्ताधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याऽक्षततया तद्वदन्यत्वेन धूमादौ लक्षणसमन्वयादिति; तन्नसाधु;— तथासति **किञ्चे** त्याद्यग्रिमदोषासङ्गतेः, गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायाएव उक्ताधिकरणताभिन्नायाः प्रसिद्धेः ।

**वह्निमतिचे** ति । तथाच **तेनैव सम्बन्धेने** त्यनुक्त्वा यत्किञ्चित्सम्बन्धेनेत्युक्तौ पर्वताद्यवच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्न

[दी] समवायेनावृत्तावपि न क्षतिः ।

---

वह्निमत्समवेतत्वाभावसत्त्वात् धूमस्य वह्निव्याप्यत्वं नोपपद्यतइति भावः । साध्यवत्सम्बद्धत्वसामान्याभावनिवेशे वह्निमत्समवेतत्वाभावस्य लक्षणाघटकत्वेपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्सम्बद्धत्वसामान्याभावस्याऽप्रसिध्या असम्भवो बोध्यः, साध्यवदसम्बद्धस्य हेतुमति सम्बन्धासम्भवात् अवच्छेद्याधिकरणसम्बन्धिनएव अवच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात् । नक्षति रिति । नाव्याप्तिर्नासम्भवश्चेत्यर्थः । साध्यवत्ता च साध्यतावच्छेदकसम्बन्धेन बोध्या, तेन समवायेन वह्नौ साध्ये संयोगेन धूमे हेतौ पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावसत्त्वेपि नातिव्याप्तिः; न वा सद्धेतावपि यत्किञ्चित्सम्बन्धेन यत्साध्यवान् तद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्त्वेपि दोषः ।

साध्यवत्त्वञ्चोपलक्षणविधया ऽभावप्रतियोगितावच्छेदककोटौ निवेशनीयम्, न तु विशेषणविधया; तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्त्वेपि "गन्धवान् पृथिवीत्वात्" इत्यादौ, मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यसत्त्वात् तादृशवृक्षाद्यवच्छेदेन एतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेपि "कपिसंयोगी एतद्वृक्षत्वा"दित्यादौ वा नाव्याप्तिः; तत्तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्र तत्र हेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्त्वात् । नचैवमपि धूमादौ पर्वतवृत्तेरनवच्छेदको यो देशः कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्त्वादव्याप्ति दुर्वारैवेति वाच्यम्;— तत्तद्देशकालावच्छिन्नपर्वतादे र्धूमाद्यसम्बन्धितया धूमादावभाववृत्तावपि तादृशस्याऽवच्छेदकत्वात् । नचैवं "उत्पत्तिक्षणविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्व" मित्यादिप्रतीत्यनुपपत्तिः; "द्रव्यत्वे गुणे न पृथिवीत्व

[टी] तादृशाभावश्च सम्बन्धान्तरेण वर्तमाने

---

ामानाधिकरण्य " मित्यादिप्रतीतिवदुक्तप्रतीते स्सामानाधिकरण्यावच्छेद त्वाभावावलम्बनता न सम्भवति, विशेष्यस्यावच्छेदकत्वे विशिष्टस्यावच्छे कत्वासम्भवात् इतिवाच्यम्; तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्ट र्वतावच्छेद्यत्वाभावावगाहितयैवोपपत्तेः । " उत्पत्तिक्षणे पर्वते धूमस्य न ह्निमत्संयुक्तत्व " मित्यादौ पर्वतावच्छिन्नं यत् धूमस्य वह्निमत्संयुक्तत्वं ास्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः सम्भवति; धूमनिष्ठवह्निम संयुक्तत्वाभावे उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः; पर्वतस्य प्रतियो यवच्छेदकतया तदन्तर्भावेण द्वयोरभावावच्छेदकत्वस्यासम्भवात्, घट ाटयो र्घटत्वाभावाधिकरणतावत्; एतेन उक्तोभयावच्छिन्नसाध्यसामानाधिकर ण्याभावव्यावर्तनाय हेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषाञ्चिदनुपादेयमेव; तथासति वह्न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोळकस्वावयवो नयावच्छिन्नतया हेतुतावच्छेदकसम्बन्धेन हेतुमन्मात्रानवच्छेद्यतया अति ्याप्तिप्रसङ्गाच्च ।

केचित्तु;– विशिष्टपर्वतादे रवच्छेदकतामादाया ऽव्याप्तिवारणाय वच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्व मभावे निवेशनीयम्; एवञ्च पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि ्याप्तिः, पर्वतादे स्स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनो ्यवच्छेदकत्वात् तन्निष्ठाभावावच्छेदकताया अविरोधाया ऽवान्तरकालाव च्छिन्नत्वोपगमात् इत्याहुः ।

हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणा वच्छिन्नत्वविरहात् हेतुतानवच्छेदकसम्बन्धेन हेतुमत्सम्बद्धे हेतुमद वच्छिन्नतादृशाभावप्रसिद्धिमाह— तादृशे ति । हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्य तेनैव सम्बन्धेन हेतुमदवच्छिन्नाभावश्चेत्यर्थः ।

[दी] तत्रैव सुलभः ।

---

तत्रैव-- तादृशहेतुमत्येव । नच तथाविधरूपादौ वह्निमत्संयुक्तत्वाभावो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकम्, प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणात्; धूमवत्कपालादिसमवेतएव वह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभाव सौलभ्येपि " एतद्रूपवानेतद्रसा " दित्यादौ एतद्रूपादिमत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्त्वात् तदवच्छेदेन साध्यसामानाधिकरण्याभाववत्त्वासम्भवात् एतद्रूपादिमति सम्बन्धान्तरमात्रेण वर्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणावच्छिन्नत्वविरहेण निरुक्ताभावाप्रसिद्धे र्दुर्वारत्वादिति वाच्यम्;-- " पर्वते रूपे न वह्निमत्संयुक्तत्व " मिति प्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात् ।

यत्तु;— व्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः;तथाच धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसम्बन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायांच हेत्वनुयोगिकत्वस्याभावेन उभयाभावसत्त्वाल्लक्षणसमन्वयइति;—

तन्न;— व्याप्यवृत्ते रवच्छेदकानुपगमे " पृथिवी रूपात् " इत्यादावतिव्याप्तेः, पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात् ।

[दी] व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरणएव त
ताद्दशाभाववत्त्वम् , " सत्तायां गुणे न द्रव्यत्वसामानाधिक
मितिप्रतीतेः । नचैवं विशिष्टसत्त्वेऽव्याप्तिः,

---

अथ हेत्वधिकरणावच्छिन्नत्वस्थाने अवच्छिन्नत्वहेत्वधिकरण
त्त्वोभयाभावस्यैव निवेशनीयत्वा न्नायं दोषः, जलरूपादि
समवेतत्वाभावाधिकरणतायां अवच्छिन्नत्वविरहेणोभयाभावसत्त्वा
च तावतैव दर्शिताप्रसिद्धेरपि निवारितत्वात् ताद्दशोभयाभाव
णतावदन्यत्वमेव निवेशनीयम् , नतूक्ताधिकरणतासामान्ये हे
कत्वताद्दशोभयाभाववत्त्वोभयाभावः, प्रयोजनविरहात्; इतिचेत्
मपि वक्ष्यमाणायाः कालिकसम्बन्धेन हेतावव्याप्तेरसङ्गतिर्दुर्वा
कालिकसम्बन्धेनाऽवृत्तिगगनादावेव दर्शितोभयाभाववत्साध्यसामा
ण्याभावाधिकरणतायाः प्रसिद्धेः; अवृत्तावेव सर्वत्र ताद्दशाभा
सम्बन्धान्तरेणवर्तमानपर्यन्तानुधावनविरोधश्च ; तस्माद्व्याप्य
च्छेदकवत्त्वमेव ग्रन्थकाराभिमतमित्यवधेयम् ।

" द्रव्यं सत्त्वा " दित्यादावाशङ्कितामतिव्याप्तिमुद्धरति- व
रिणश्चे ति । ताद्दशी ति । हेतुतावच्छेदकसम्बन्धेन हेतुम
अवच्छेदकत्वं सप्तम्यर्थः ! **ताद्दशाभाववत्त्वम्**— हेतुतावच्छेदक
साध्यवद्वृत्तित्वाभाववत्त्वम् । अत्र प्रमाणाकांक्षायामाह—
मिति । ईद्दशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्ता
वच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति भावः ।
सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे । **विशिष्टसत्त्वे**— गु
विशिष्टसत्तात्वाद्यवच्छिन्ने । **अव्याप्ति** रिति । गुणाद्यवच्छेदे

[दी] विशिष्टस्यातिरिक्तत्वात् ।

---

सामानाधिकरण्याभाववति केनापि रूपेण तदनधिकरणत्वासम्भवादि भावः । **विशिष्टस्ये** ति । तथाच विशिष्टसत्त्वं द्रव्यमात्रवृत्ति, त धिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसा नाधिकरण्याभाववत्त्वमिति भावः ।

यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापि मव्याप्ति श्शक्यते वारयितुम् , तथापि प्रकारान्तरेण वारणसम्भवे लक्ष अधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टातिरिक्तत्वादिपक्ष आश्रितः नच हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकम् , अन्यथा " ः स्पर्शवत् भूतत्वमूर्तत्वोभयस्मा " दित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वा करणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसङ्गादि वाच्यम् ; उभयत्वस्यैकविशिष्टापरत्वरूपतामवलम्ब्य विशिष्टस्यातिरि तया तत्र स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन उभयत्वस्यै हेतुत्वमिति स्वीकृत्यैव वा तत्राऽव्याप्ते स्समाधानसम्भवात् । ननु " द्र गुणाद्यन्यत्वे सति सत्त्वा " दित्यादौ विशिष्टातिरिक्तत्वपक्षमवलम्ब्य व्याप्तेर्वारणं न विचारसहम् , तथाहि;-- गुणादिवृत्तिसत्तादितो गुणाद्यन्य विशिष्टसत्तादे रतिरिक्तत्वे अनुगतधर्ममात्रोच्छेदः, एकव्यक्तिवृत्तित्वविशि स्याऽपरव्यक्तिवृत्त्यन्यत्वात् । नच तत्तद्व्यक्तिवृत्तित्वविशिष्टसत्तादे मिथो भेदेपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम् ; शु सत्तादौ तत्तद्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासम्भवा तदनभ्युपगमे तस्याः अवृत्तित्वप्रसङ्गात् । एवं सर्वेषामेव वस्तूनां ः स्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसानं दुर्वारमे

[दी] अनतिरेके तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया

अथ प्रत्यभिज्ञाद्यनुरोधेन एकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं
क्रियत एव, परन्तु "गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति," "इदानीं
क्षणवृत्तित्वविशिष्टघटो नास्ती" ति प्रतीत्यनुरोधेन मिथो भिन्ना अपि
द्विशेषणविशिष्टसत्त्वघटादयः स्वीक्रियन्ते, तदवलम्बनतयैव तादृश
त्युपपत्तेः द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेणचानुगतसत्त्वादेः न द्रव्य
नुमापकता स्वीक्रियते, अपि तु तदन्यतादृशविशेषणविशिष्टगुणाध
वस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तेर्विरहेपि न क्षति रितिचेत् ? ता
वस्तूनां केन रूपेण व्याप्यता?, न द्रव्यवृत्तित्वादिविशिष्टत्वेन, ताद
धर्मस्याव्याप्यानुगतधर्मसाधारण्यात् ; नापि तादृशविशेषणविशिष्टतद्व
क्तित्वादिना, तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात्, तद्व्यक्ति
द्यनुपस्थितावनुमानानिर्वाहाच्च । एवं " विशिष्टसत्ता नास्ती " त्यत्र विशि
सत्तात्वाद्यवच्छिन्नाभावस्य न विषयतासम्भवः, तद्रूपावलीढानुगतस
वति तद्रूपावच्छिन्नाभावासम्भवात् । नापि तद्व्यक्तित्वावच्छिन्नाभाव
तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात् । विशेषणावच्छिन्नप्रतियो
स्सम्बन्धो विलक्षणः, स च नानुगतसत्तायास्सम्बन्धः, अपि तु तद
रिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिस
साधारण्येपि तत्र विशिष्टाभावोऽक्षत एव, प्रतियोगितावच्छेदकावच्छि
प्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वे अपेक्षितत्वा
चेत्?– तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तसम्बन्धो गुणादि
वृत्त स्स्वीक्रियताम्, किं सम्बन्धन्तरकल्पनेनेत्यभिप्रेत्याह— **अनति
त्वि ति** । **विशेषणविशेष्यसम्बन्धस्यैवे** ति । सत्तादिनिष्ठगुणाद्यन
वैशिष्ट्यस्यैवेत्यर्थः । **परम्परया**— परम्परासम्बन्धेन; स्वावच्छि

[दी०]व्याप्यत्वात् केवलान्वयिन्यव्याप्त्यभिधानं द्वितीयलक्षणाभिप्रायेणे त्याहुः; तच्चिन्त्यम् ।

---

निरूपितसमवायादिसम्बन्धेनेति यावत् । व्याप्यत्वा दिति । गुणाद्यन्य त्ववैशिष्ट्यावच्छिन्नाधिकरणतायाः गुणादावसत्त्वात् तादृशसम्बन्धेन तद्वै शिष्ट्यस्य द्रव्यमात्रवृत्तित्वादिति भावः । एवकारेण सत्तायाः व्याप्यत्व व्यवच्छेदः । यत्र विशेषणविशेषावच्छिन्नसत्ताहेतुकद्रव्यत्वाद्यनुमितिरभि मता, तत्र तद्वैशिष्ट्यहेतुकानुमितिरेवोपेयते, वैशिष्ट्ये परम्परासम्बन्धेन व्याप्तिधीविरहेचानुमितिरसिद्धैवेति भावः ।

यद्यपि विशिष्टनिरूपितसम्बन्धस्य विलक्षणत्वे तादृशसम्बन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति, तथापि विशेषणावच्छिन्ननिरूपित समवायत्वादिना न सत्तादि सम्बन्धता,किन्तु "विशिष्टसत्तावा"निति प्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्योक्तपरम्परासम्बन्धेन धर्मिणि विशे-षणत्वोपगमात् नातिप्रसङ्ग इत्याशयेनेदमभिहितम् । नन्वेवंरीत्या प्रथम लक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिः, तत्रापि सम्ब न्धान्तरेण हेतुमद्वृत्तौ हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभाव प्रसिध्या लक्षणगमनसम्भवात् अतआह—केवलान्वयिनी ति । द्वितीय लक्षणे ति । नच तच्चे त्यनेन उभयत्वावच्छिन्नस्यैव परामर्शात् प्रथम लक्षणेऽव्याप्त्यसम्भवे असङ्गतिर्दुर्वारैवेति वाच्यम्,केवलान्वयि साध्यकेधूमेच्या व्याप्तिप्रदर्शनात् तदुभयत्वेनोपस्थितप्रथमलक्षणे अव्याप्त्यसम्भवेपि लक्षणद्वये यथायोगं तत्तत्स्थले अव्याप्त्यन्वये तात्पर्यात् । यद्यपि धूमादावपि साध्य सामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यवकाशः, तथापि यत्किंचित्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण द्वितीयलक्षणस्यैव य त्किंचित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि ना-

[दी] " सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्य " मिति प्रतीतिर्हि " द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्य " मिति प्रतीतिवत् सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन,

---

नाव्यक्तिसाध्यके अव्याप्तिप्रदर्शनमविरुद्धम् । मूले च **यत्किंचित्साध्यानधिकरणाधिकरण** इत्युपलक्षणम्, यत्किंचित्साध्याधिकरणावृत्तावित्यपि बोध्यम्; तेन प्रथमलक्षणाव्याप्तिसम्पादकहेत्वकथनान्न्यूनत्वस्य नावकाश इति ध्येयम् ।

सामानाधिकरण्यस्याऽव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शिताति व्याप्ति वारयितुं शक्यते, तत्रैव न प्रमाणम्, उक्तप्रतीतेरन्यविषयकत्वादित्याह- **सत्ताया** मिति । **प्रतीतिर्हि** ति । **अभावं गुणे अवगाहत** इत्यनेनाऽन्वयः । **अवच्छेदकत्वस्ये** ति । निरूपकत्वस्येत्यर्थः; तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदवच्छेदकत्वस्याऽप्रामाणिकत्वेपि न क्षतिः । उक्ताकारप्रतीतावच्छेदकत्वानुल्लेखात् अवच्छेदकत्वाभावावगाहिता न सम्भवतीत्याशङ्क्याह- **परम्परे** ति । ननु उक्तपरम्परासम्बन्धो न वृत्तिनियामकः, ' आकाशं द्रव्यत्वसामानाधिकरण्यवत् ' इत्यप्रत्ययादित्युक्तसम्बन्धावच्छिन्नाभावएवाऽप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीते स्सम्भवतीत्याशङ्कोद्धारायाऽनुरूपं दृष्टान्तमाह- **द्रव्यत्व** इति । गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्वपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धावच्छिन्नतादृशसामानाधिकरण्यस्य वा अभाव एव तादृशप्रतीतिविषय इत्यवश्यमुपेयम्, तद्वदत्रापीत्यर्थः ।

[दी] सामानाधिकरण्यस्यवा ऽभावं गुणेऽवगाहते, न तु सत्तायामेव द्रव्यवृत्तित्वाभावम् , 'सत्ता न द्रव्यवृत्तित्वाभाववती' 'द्रव्यवृत्तित्वाभावो वा न सत्तावृत्ति' रित्यादिसर्वजनप्रसिद्धप्रतीतिबाधितत्वात् ।

---

स्वरसतो यादृशशब्दाद्यादृशार्थः प्रतीयते तादृशशब्दोल्लिखित प्रत्यये तादृशार्थविषयकत्वमेवाऽसति बाधके युज्यतइ त्याशयेन दर्शित प्रतीतेः स्सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीति माह— सत्ता न द्रव्यवृत्तित्वाभाववती ति । नच द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्ताया मस्मन्मतेपि सत्त्वा न्न तस्याः प्रतीते र्बाधकत्वं सम्भवति, विरोध्यविषयकत्वादिति वाच्यम् ; तादृश शब्देन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्यायनात् , तदाकारप्रतीतेरपि तद्भेदावगाहितया बाधकत्वात् , भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभाववद्भेदस्य तदभावविरोधित्वात् । यदि च भेदस्याव्याप्यवृत्ति त्वमत मवलम्ब्य तादृशप्रतीतेः विरोध्यविषयकत्व मुपपाद्यते ? तदा सत्तायां द्रव्यत्वसामानाधिकरण्याभावेपि तदधिकरणभिन्नत्वस्या ऽक्षत तया ऽतिव्याप्तिवारण मशक्यमेवेति भावः ।

अव्याप्यवृत्तित्वसाधकदर्शितप्रतीते रभावरूपविशेष्ये सत्तावृत्तित्वा वगाहिताया उपगमात् तादृशाभावविशेष्यकसत्तावृत्तित्वविरोधिविषयक प्रत्ययं बाधकतयोपन्यस्यति— द्रव्यवृत्तित्वाभाव इति । यद्यपि द्रव्य वृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन, न तु द्रव्यावच्छेदेनेति तद वच्छेदेन तत्र सत्तावृत्तित्वाभाव स्सम्भवति, एवं सत्तावृत्तित्वं सत्तात्वसा- मानाधिकरण्यरूपम्, सामानाधिकरण्यस्याऽव्याप्यवृत्तितामते अव्याप्यवृत्तीति तदनवच्छेदकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभावे तदभाव स्सम्भवत्येवेति न विरोधः, तथाप्युक्तयुक्त्या दर्शितप्रतीते स्सत्तावृत्तिभेदावगाहितया

[दी] बाधकाभावात्तु संयोगतदभावयो रवच्छेदकभेदेन एकत्र प्रतीत्या तदुभयो रेकत्र सिद्धिः । अतीन्द्रियसाध्यके अतीन्द्रिये व्यभिचारिण्यतिप्रसंगाच्च । तत्र सामानाधिकरण्याभावस्य

---

बाधकत्वं दुर्वारमेव । यत्तु; सत्तावृत्तावभावे अवच्छेदकभेदेन सत्ता वृत्तित्वाभावसम्भवेपि अवच्छेदकाप्रतीतिदशायां जायमानतत्प्रत्ययस्य सत्ता वृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानायाः " सत्तायां गुणे न द्रव्यत्व सामानाधिकरण्य " मिति प्रतीते स्सामानाधिकरण्याभावे सत्तावृत्तित्वाभा वावगाहित्वासम्भवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावावगा हित्वे सर्वत्रैव तदवगाहित्वकल्पन मुचितमिति भाववर्णनम्; तद सत्;-- एवंसति अवच्छेदकाविषयिण्या द्रव्यत्वसामानाधिकरण्यत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकतासम्भवेन " सत्ता न द्रव्य वृत्तित्वाभाववती " इत्यादिप्रतीतिपर्यन्ता ऽनुधावनस्य निर्बीजत्वापातात् ।

नन्वेवं संयोगादिमति संयोगादेरप्यभावो मा सैत्सीत्, "मूले न संयोग" इति प्रतीतेरपि मूलनिष्ठसंयोगाद्यवच्छेदकत्वाभावाऽवलम्बनतयोपपत्तेरि त्यत आह-- **बाधकाभावा** दिति । तत्र " कपिसंयोगाभावो वृक्षावृत्तिः " इत्यादिप्रत्ययस्याऽननुभवादिति भावः । ननु संयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वाभावप्रत्ययेपि विवादसम्भवात् यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसम्भवः तत्र तत्सत्त्वे मानाभावेन तदनधिकरणत्वं निष्प्रत्यूहमित्यातिव्याप्तिरित्याह—**अतीन्द्रियसाध्यक** इति। " इदं गुरु- द्रव्यत्वात् " " पृथिवी-गुरुत्वात् " इत्यादावित्यर्थः । अथवा स्तम्भादौ पिशाचत्वाभावस्येव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्या भावस्य, महति वायौ रूपाभावस्येव महावायुत्वादौ रूपसामानाधि करण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम् । **तत्रे** ति । गुरुत्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्या ऽतीन्द्रियप्रतियोगिक

[दी]प्रत्यक्षासम्भवेनासिद्धेः । नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्; तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात् ।

किंच "इदमिदानी" मिति प्रतीतिनियामकविशेषणताविशेषेण

---

तया अतीन्द्रियहेतुकस्थले च धर्मिण एव तथात्वात् हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः। **तदभाववद्वृत्तित्वेन**— गुरुत्वाभाववद्वृत्तित्वेन। **तत्र**- द्रव्यत्वादौ । तत्— गुरुत्वादिमद्वृत्तित्वाभाववत्त्वम् । **अनुमेय** मिति । तद्विरुद्धदृष्टान्तेनेत्यादिः । **तद्वदि** ति । गुरुत्वादिमदित्यर्थः । **उपाधित्वा** दिति । तद्वद्वृत्तिभिन्नत्वस्य तद्विरुद्धदृष्टान्ते साध्यव्यापकतायाः पक्षीभूते प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकताया स्सुग्रहत्वात् पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ सन्दिग्धोपाधेर्दुर्वारत्वात् अनुकूलतर्कविरहेण साध्यव्यापकतानिश्चयासम्भवेपि सन्दिग्धोपाधेरपि दूषकत्वादिति भावः।

नन्वेवमतीन्द्रियसंयोगादेरप्यव्याप्यवृत्तित्वं न स्यात्, तद्वति तदभावप्रत्यक्षासम्भवेनाऽसिद्धेः, अनुमानस्याप्रयोजकत्वात्। एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे **कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण** इति ग्रन्थेन अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्भृता, तथाच तन्मते युक्तिर्भवतु मा वा, उभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नाऽपराध्यतीत्याशङ्क्य दूषणान्तरमाह— **किञ्चे** ति । **इदानी** मिति । कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः । अभावादेरिहेति प्रतीतिनियामको यो दैशिकविशेषणताविशेषः तत्र तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम्। नच इदानीमिति प्रतीतौ

[दी] हेतुतायां सद्धेतावव्याप्तिः, तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ।

---

सम्बन्धवैलक्षण्याभावेपि कालत्वेनाधिकरणतावगाहनात् इहेति प्रत्ययात् तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यम्; सम्बन्ध विशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात्; 'इदानीं कालत्वा भाव' इत्यादिप्रतीत्या काले कालत्वाद्यभाववृत्तेः प्रामाणिकत्वेपि 'काले कालत्वं नास्ती' ति प्रतीत्यनुदयात् 'नास्ती' त्याकारकप्रतीतौ कालिकसम्ब न्धव्यावृत्तरूपावच्छिन्नाया एव विशेषणतायाः नियामकत्वस्यावश्यक त्वात् दैशिककालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धे सम्बन्धावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धे र्निष्प्रत्यूहत्वाच्च। **सद्धेता** विति । कालत्वादिसाध्यकघटादिहेतावित्यर्थः । **काल** इति । कालावच्छेदेनेत्यर्थः । **अप्रासिद्धे** रिति । वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वादवृत्तिनिष्ठतदभावस्य कालानवच्छिन्नत्वात् अवच्छेद्याधिकरणासम्बन्धिनोऽनवच्छेदकत्वात् ।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव कालवृत्तित्वा भावः प्रसिद्ध्यति, महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्व स्याऽसत्त्वात; स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठा- भावावच्छेदकत्वसम्भवाच्च । नच तादात्म्यसम्बन्धो नावच्छेदकतानि- यामकः, "रूपे पर्वते न वह्निमत्संयुक्तत्व" मितिवत् "रूपे स्वस्मिन् न वह्निमत्संयुक्तत्व" मिति प्रतीते स्सविवादत्वात् इति वाच्यम्; तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्ब- न्धिनि हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छेदेन साध्यसामानाधिकरण्याभाव- वत्त्वविरहादतिव्याप्तेः स्फुटतया तद्दोषापेक्षाया अनुचितत्वापातादिति चेत्;

अत्र केचित् ; — कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमिति भिप्रायकोयं ग्रन्थः, तथाच कालावच्छेदेन महाकालेपि कालिक न्धेन साध्यवद्वृत्तित्वसत्त्वात् तद्विरहिणो ऽप्रसिद्धिर्न विरुध्यत इति वद

वस्तुतस्तु, स्वस्मिन् सामानाधिकरण्यतदभावयोः वृत्त्यवच्छेदकत्वे धिकरणत्वमेव नियामकम् , न तु स्वसम्बन्धितामात्रम् , स्वाधि वच्छेदेनैव स्वास्मिन् तत्प्रतीते रनुभवसिद्धत्वात् ; अत एव सम्ब न्तरेण सम्बन्धिनत्युपेक्ष्य वर्तमान इत्यभिहितम् । नचैवं तादा वृत्त्यनियामकसम्बन्धेन व्यभिचारिण्यतिव्याप्त्यकथनात् न्यूनता दुर्वा वाच्यम् ; तादृशसम्बन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरणत्व ऽप्रसिद्ध्याऽतिव्याप्त्यसम्भवात् । नच तेन सम्बन्धेन सद्धेतौ लक्ष मनाय वृत्तेरधिकरणतायाश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्व निवेशनीयत्वा दतिव्याप्ते रावश्यकतेति वाच्यम् ; प्राचां मते सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भवः इ प्रायेणैवातिव्याप्त्यनुद्भावनात् ।

एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्ब तदवृत्तौ तद्विषयकज्ञानएव साध्यासामानाधिकरण्यप्रसिद्धिस्सम्भ नन्वेवमपि "कालत्ववान् सर्वस्मा" दित्यादौ खण्डकालस्य हेत्व करणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धि र्दुर्व वाच्यम् , हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वपर्यन्तानिवेशेन वा व्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वं तत्र तादृशधर्मस्यैवैतन्मते वच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्य अभिम उक्तस्थले सर्वत्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेन कालिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन स द्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति परा तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेपि तादृशसम्बन्धस्य

नियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहेण च तस्य तज्ज्ञानानधिकरणत्वात् तज्ज्ञाने अभाववृत्तौ तत्कालस्यानवच्छेदकत्वात् ।

महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्राय कोयं ग्रन्थः, तादृशसम्बन्धेन हेतुमत्तायाः खण्डकालेऽभावान्नोक्तादिशाऽप्रसिद्धिः इत्यपि केचित् ।

अत्र स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यवकाशः ; स्वावयवपरमाण्वाद्यवच्छेदेन घटादौ वर्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणसमन्वयसम्भवात् केवलान्वयिसाध्यके मेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वसत्त्वात् तन्निष्ठतदभावाप्रसिद्ध्या ऽव्याप्ति र्न क्षति मावहति, मूलकृतैव तत्राव्याप्ते र्वक्ष्यमाणत्वात् । यदि चैवं "आत्मभिन्नं ज्ञानवदन्यत्वा" दित्यादौ हेतोरात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वात् आत्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात् तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववृत्त्यसम्भावात् हेतुनिष्ठतादृशाभावाऽप्रसिद्ध्या अव्याप्तिरिति विभाव्यते?, तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्तते योऽभावः तत्प्रतियोगितानवच्छेदकतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वत्वकत्वं व्याप्ति रित्येव विवक्षणीयम् ; "कालत्ववान् घटात्" इत्यादौ कालावच्छेदेन घटादौ वर्तमानः कपालसमवेतत्वाद्यभाव एव प्रसिद्धः,तत्प्रतियोगितानवच्छेदकं च कालिकसम्बन्धावच्छिन्नकालवृत्तित्वत्वादिकमिति लक्षणसमन्वयः । हेतुमति हेतुताच्छेदकसम्बन्धेन यद्वृत्तिमत् तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदक तत्सम्बन्धावच्छिन्नतद्वस्तुप्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम् , "आत्मभिन्नं ज्ञानवदन्यत्वा" दित्यादौ आत्मा

च्छवच्छेदेन घटत्वाभावादिनिष्ठात्मान्यवृत्तित्वाभावस्यानवच्छेदकं घटत्व भावज्ञानवदन्यत्वोभयाधिकरणतावत्सामान्यमिति लक्षणसमन्वयः । उभयाधि करणत्वनिवेशात् " वह्निमान् धूमा " दित्यादौ धूमादिसंयोगिनः कपालादे घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेपि न क्षतिः, कपालादेः स्संयोगेन घटानधिकरणतया उक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात् ।

अथवा हेतुतावच्छेदकसम्बन्धेन यद्धेत्वधिकरणं तदवच्छिन्न स्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्ष णात् न कश्चिद्दोषः; सर्वत्र सद्धेतावन्ततः अवृत्तौ प्रसिद्धे साध्य सामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात् वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावे अयोगोळकादेरिव तद्वृत्तित्व स्याप्यवच्छेदकत्वात् , स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनवच्छि न्न हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा वि क्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ॥

## इति गादाधर्यां सार्वभौमपरिष्कारः ।